P: ISSN NO.: 2321-290X RNI : UPBIL/2013/55327 **SHRINKHALA : VOL-II * ISSUE-II*October-2014**
E: ISSN NO.: 2349 – 980X

# भगवद्गीतासु पुनर्जन्मवादः

**वीरेन्द्र कुमार हालदार**
कान्दरा आर0 के कुण्डू
महाविद्यालय

**सारांश**

मृत्यूपरान्तमात्मना सह शरीरेन्द्रियप्राणमनसामेकत्र यः पुनः संयोगः, पुनर्जन्मेत्याख्यायते, अर्थादीदृशः संयोग एवं जन्म, तथेदृशसंयोगस्य नाशो वा उक्तवस्तूनो पारस्परिको विभाग एव वा मरणमस्तीति, 'पुनर्जन्मे' ति शब्दे पुनः शब्द एतत् सूचनाय विद्यते यज् जन्ममृत्व्योरियं परम्पराऽनादिकालादायातीति। इमां जन्ममृत्युपरम्परामेव शास्त्रकाराः 'संसार' शब्देन व्यवाहाषुः। न्यायदर्शने महार्षिगौतमस्य ''पुनरूत्पत्तिः प्रेत्यभावः'' (1/1/29) इति सूत्रं वैशेषिके कणादमहर्षेश्च ''तत्संयोगो विभागः'' (6/2/15) इति सूत्रमपि चाद एवं लक्षणं पुनर्जन्मनः सूचयतः।

**मुख्य शब्द** : संसार, पुनर्जन्मे, पुनरूत्पत्तिः प्रेत्यभावः, पुनर्जन्मवादः।

**प्रस्तावना**

उपर्युक्तात् पुनर्जन्मलक्षणाद भ्रान्तिरियमपैति यद् देहेन्द्रियादिभौतिकतत्त्वैः सहैव चेतनतत्त्वमपि स्वतो जायद इति, तथेयमाशङ्कापि नावतिष्ठते यद् आत्मनो नित्यपदार्थत्वपक्षे उत्पत्तिरूपं तज्जन्म नाशरूपस्तन्मृत्युर्वा कथं संभाव्यत इति। यतो हि वैदिकदर्शनेषु आत्मा नित्यः सर्वव्यापकश्चास्ति। तथा नित्यसता तेनात्मना सह शरीरेन्द्रियदिनूतन भौतिक तत्त्वानां संसर्ग एवोत्पद्यते नश्यति चेति, इयं स्थितिरेव जन्म मृत्युर्वोच्यते।

यथा हि वद्यछक्तिः सर्वत्र सर्तमाना भवति, किन्तु उपकरणविशेषमासाद्य क्वचित् कदाचिद्भिव्यज्यते तथा तथाविधोपकरणविशेषापाये तिरोधीयते, तद्वत्। दीपशलाकायां काष्ठे वा पूर्वतोऽग्निर्वर्तते घर्षणद्वारा च प्रकटो भवति। एवमेव शरीरेन्द्रियप्राणात्मकानां भौतिकतत्त्वानां संसर्गात् पूर्वतो वर्तमानात्मानि चैतन्यमभिव्यज्यते, तथा विकीर्पोषु तषु भौतिकतत्त्वेषु तदीय चेतन्यं–––––भवति।

यथाऽस्मिन् देहे कौमारं यौवनं वार्धक्यं च निश्चयेन सर्वेषां भवन्ति, तथैवात्मनो देहान्तरस्यापि प्राप्तिर्बोभवीत्येवेति बुद्धिमान् जनो नास्य देहस्य कृते मोहग्रस्तो भवति।

वासां जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि। तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही।। गीता 2/21

मनुष्यो यथा प्राचीनवस्त्राणि त्यक्त्वा नवीननि वस्त्रान्तराणि घारयति, तद्वदयमात्माऽपि प्राक्तनदेहं व्यक्त्वा प्रतिजन्म नवं नवं देहं धारयति,।

जातस्य हि ध्रवोमृत्युर्ध्रवं जन्म मतस्य च तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि।। गीता 2/27

इति भगवद्वचनमपि स्फुटं विज्ञापयति यदुत्पन्नस्य मृत्युर्निश्चितो मृतस्य च पुनर्जन्म निश्चितम्। अतो हे अर्जुन! यदनिवार्यमस्ति तदर्थे शोको न विद्येय इति।

जन्म कर्म च मे दिव्यमेव यो वक्ति तत्त्वतः
व्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन।। गीता 4/9

अर्थात् हे अर्जुन! इत्यंभूतं मदीयं जन्म च कर्म च यो वेत्ति सम्यग् जानाति, स मरणानन्तरं पुनर्जन्म न गृह्णाति, प्रत्युत मां प्राप्तो भवति,।

इत्यंमुपर्युद्घृतैर्गीतावचनैः पुनर्जन्मसिद्धान्तोऽतिस्पष्टतया समर्थितो भवति,

अन्तिमेन श्लोकेनेदं प्रतिपाद्यते यद्यामम जन्म कर्म च सम्यग् जानाति, स एव जनः पुनर्जन्म न गृहणाति यस्तु नो जानाति, तेन तु पुनः पुनर्जन्ममरणबन्धनेऽवस्थातव्यमेव भवतीति।

इमां जन्ममृत्युपरण्पराय शास्त्रकाराःसंसार शब्देन व्यवाहार्षः, तिरोहितं भवति।

यद्यपि विश्वमान्यायां श्रीमद्भगवद्गीतायां पञ्चन् विशंत्यवसरेषु पूर्णस्पष्टतया पुनर्जन्मनः प्रतिपादनं कृतं विद्यते, तथापि त्रिचतुराणि तदीयोदाहरणान्यपि प्रदर्श्यं श्रुतिस्मृतिप्रकरणमिदभवसायविष्यते,।

देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा। तथा देहान्तरप्राप्तिधीरस्तत्र न मुह्यति।। गीता 2/13

P: ISSN NO.: 2321-290X RNI : UPBIL/2013/55327 **SHRINKHALA :** VOL-II * ISSUE-II*October-2014
E: ISSN NO.: 2349 – 980X

**सन्दर्भ**

1. ''पुनरूत्पत्तिः पत्यभावः''(1/1/29)
2. ''तत्संयोगो विभागः'' (6/2/15)
3. गीता 2/21
4. गीता 2/27
5. गीता 4/9
6. गीता 2/13

# Review Form

Reference No ........................................................................ Author Name:........................................................................................
Title of the Paper ..........................................................................................................................................................................

**Please give your comments on following points in "Yes" or "No" and explain your views in both the cases (yes or no). Also, express your views in General Comments Section, if those are not cover in under written points.**

**Are you satisfied with following :**

| S.L. | Sections | Satisfaction Yes/No | Comments/Suggestion |
|---|---|---|---|
| a | Title | ............ | |
| b | Abstract | ............ | |
| c | Keywords | ............ | |
| d | Introduction | ............ | |
| e | Objective of the Study | ............ | |
| f | Review of Literature | ............ | |
| g | Hypothesis | ............ | |
| h | Methodology | ............ | |
| i | Research Design | ............ | |
| j | Findings/ Result | ............ | |
| k | Figure | ............ | |
| l | Tables | ............ | |
| m | Conclusion | ............ | |
| n | Suggestion | ............ | |
| o | References/ Footnote | ............ | |
| p | Spelling/ grammatical / punctuation error | ............ | |
| q | Questionnaire /Survey/ Testing/observation Report | ............ | |
| r | General Comments | | |
| S | Suggestions | | |

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| t | **Decision** (Please write the recommendation about the paper & rate the paper by marking **A, B or C** if paper is accepted) | **Accepted** | | **A / B / C** | | | | | |
| | | **To be Corrected** | | Rating is based as per below marking | | | | | |
| | | **Rejected** | | **A** | **9-10** | **B** | **6-8** | **C** | **1-5** |